# MP BOARD CLASS 10 SANSKRIT GENERAL MODEL PAPER SET 1 2020

## म.प्र. बोर्ड कक्षा 10 संस्कृत (सामान्य) मोडल पेपर सेट 1 2020

समयः : घण्टात्रयम्] [पूर्णाङ्काः : १००

निर्देशा:-(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नाना सम्मुखे अङ्काः प्रदत्ताः।

प्रश्न १. उचितविकल्पं चित्वा लिखत(क) 'भानूदयः' इत्यस्मिन् पदे सन्धिः अस्ति-

(अ) दीर्घसन्धिः (ब) यण्सन्धिः (स) अयादिसन्धिः (द) वृद्धिसन्धिः ।

(ख) 'महौषधिः' इत्यस्य पदस्य सन्धि-विच्छेदः अस्ति-

(अ) महो+ओषधिः (ब) महा+औषधिः (स) महे+औषधिः (द) महे+ओषधिः।

(ग) "निस् + छलः' इत्यस्य पदस्य सन्धिः अस्ति-

(अ) निस्छलः (ब) निशछलः (स) निषछलः (द) निश्छलः।

(घ) विसर्गसन्धिः अस्ति-

(अ) नयन (ब) नमस्ते (स) नैक (द) नास्ति।

(ङ) अधोलिखितेषु अव्ययम् अस्ति-

(अ) कथा (ब) करोति (स) रूपं (द) कदा।

उत्तर-(क) (अ),(ख) (ब),(ग) (द), (घ) (ब), (ङ) (द)।

प्रश्न २. उचितविकल्पं चित्वा लिखत- १×५ = ५

(क) 'महापुरूषः' इत्यस्मिन् पदे समासः भवति-

(अ) तत्पुरुषः (ब) अव्ययीभावः (स) द्वन्द्वः (द) कर्मधारयः।

(ख) 'बहुब्रीहिसमासस्य' उदाहरणम् अस्ति-

(अ) चन्द्रशेखरः (ब) पञ्चपात्रम् (स) कृष्णभक्तः (द) पितरौ।

(ग) 'विद्यालयः' इत्यस्य पदस्य समासविग्रहः अस्ति-

(अ) विद्या+आलयः (ब) विद्यायाम्+आलयः (स) विद्यायाः+आलयः (द) विद्य+आलयः।

(घ) 'प्रधानाचार्यः' इत्यस्मिन पदे उपसर्गः अस्ति-

(अ) प्र (ब) प्राध (स) प्रधान (द) प्रध।

(ङ) अधोलिखितेषु उपसर्गः नास्ति-

(अ) प्र (ब) यत्र (स) सम् (द) अधि।

उत्तर-(क) (द), (ख) (अ), (ग) (स), (घ) (अ), (ङ) (ब)।

प्रश्न ३. उचितविकल्पं चित्वा लिखत-

(क) 'पास्यति' इत्यस्मिन पदे लकारः अस्ति-

(अ) लोट्लकारः (ब) लङ्लकारः (स) लृट्लकारः (द) विधिलिङ्लकारः।

(ख) 'वर्धते' इत्यस्मिन् पदे धातुः अस्ति-

(अ) वर्ध (ब) वार्धा (स) वृध् (द) व्रध्।

(ग) 'पचेः' इत्यस्मिन् पदे पुरुषः अस्ति-

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः (स) उत्तमपुरुषः (द) अधमपुरुषः।

(घ) 'ददति' इत्यस्मिन् पदे वचनम् अस्ति-

(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम् (द) त्रिवचनम्।

(ङ) 'सः द्विचक्रिकया तत्र गच्छति' इत्यस्मिन वाक्ये अव्ययम् अस्ति-

(अ) सः (ब) द्विचक्रिकया (स) तत्र (द) गच्छति।

उत्तर-(क) (स),(ख) (स),(ग) (स),(घ) (स),(ङ) (स)।

प्रश्न ४. चितविकल्पं चित्वा लिखत-

(क) 'क्त्वा' प्रत्ययस्य उदाहरणम् अस्ति-

(अ) पठन् (ब) पठितः (स) पठित्वा (द) पठितवान्।

(ख) 'अज +टाप्' इत्यस्य पदम् भविष्यति-

(अ) अजटाप् (ब) अजा (स) अज (द) अजटा।

(ग) 'उक्तवान्' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) क्तवतु (ब) क्त (स) क्त्वा (द) शत।

(घ) 'धार्मिकः' इत्यस्मिन पदे प्रत्ययः अस्ति-

(अ) त्व (ब) जाप (स) ठक् (द) मतुप्।

(ङ) पठतो..."मूर्खत्वम्-

(अ) भवति (ब) अस्ति (स) नास्ति (द) विद्यते।

उत्तर-(क) (स),(ख) (ब),(ग) (अ),(घ) (स),(ङ) (स)।

प्रश्न ५. प्रदत्तैः शब्दैः, रिक्तस्थानपूर्ति कुरुत- १×५ =५

(मनुष्याणाम्, बहवः, अद्वितीय, विश्वबन्धुत्वं, आत्मा)

(क) एकमेव"........"परब्रह्मः ।

(ख) गुरुकुले........."शिष्याः आसन्।

(ग) ........"सम्पोषकं संस्कृतम्।

(घ) सर्वेषु शरीरेषु......"एक एव ।

(ङ) माता किल......... "देवतानां च दैवतम्।

उत्तर-(क) अद्वितीयं, (ख) बहवः, (ग) विश्वबन्धुत्वं, (घ) आत्मा, (ङ) मनुष्याणाम्।

प्रश्न ६. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत- ३×२ =६

(क) गुरूणा छत्रसालः केन उपाधिना विभूषितः?

(ख) शिष्यान् कथं परीक्षेत ?

(ग) सर्वप्राचीना भाषा का अस्ति?

(घ) सन्तः कानि नन्ति ?

(ङ) कस्याः अपरं नाम भागीरथी?

प्रश्न ७. अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत- २

(क) राम-पञ्चमी विभक्तिः ।

(ख) पितृ-द्वितीया विभक्तिः।

(ग) तत् (पु.)-तृतीया विभक्तिः ।

| | | | |
|---|---|---|---|
| उत्तर- | (क) रामात् | रामाभ्याम् | रामेभ्यः |
| | (ख) पितरम् | पितरौ | पितृन्। |
| | (ग) तेन | ताभ्याम् | तैः। |

प्रश्न ८. 'अस्माकम्' अथवा 'राज्ञा' इति पदस्य विभक्तिं वचनं च लिखत। २

उत्तर--अस्माकम्-षष्ठी विभक्तिः बहुवचनं च।

राज्ञा-तृतीया विभक्तिः एकवचनं च।

प्रश्न ९. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

५×२-१०

(अ) वरुणदेवः वृष्टिं वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति। भूमाता वृक्षस्य आधारभूता अस्ति। वायुः अनिलं ददाति। ते सर्वे वृक्षं पालयन्ति पोषयन्ति रक्षन्ति च। ते न कदापि "मम अधिकारः वर्तते" इति अवदन्। ते सर्वे परोपकारिणः। परं यूयं सर्वे परापकारिणः वृक्षस्य

साहाय्यं स्वीकृत्य तमेव नाशयितुं कृतसङ्कल्पा यूयं स्वाश्रयमेव नाशयथ। अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गमिष्यथ ?

प्रश्न-(i) कः वृष्टिं वर्षति ?

(ii) सूर्यदेवः किं प्रयच्छति ?

(iii) का वृक्षस्य आधारभूता अस्ति ?

(iv) कः अनिलं ददाति ?

(v) के परोपकारिणः ?

(ब) गङ्गातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म। तस्य गुरुकुले बहवः शिष्याः आसन्। वासुदेवः तस्य प्रियशिष्यः। तस्य द्वादशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरुः तम् आहूय अवदत्-"शिष्य ! अधुना भवान सर्वविद्यापारङ्गतः अस्ति। अतः इतः परं स्वग्रामं गन्तुम् अर्हति भवान्। गमनात् पूर्वं भवता द्वारकापुरस्य देवराजस्य गृहं दृष्ट्वा आगन्तव्यम्। किन्तु गृहस्यान्तः न गन्तव्यम्" इति। http://www.mpboardonline.com

प्रश्न-(i) गङ्गातीरे कः वसति स्म ?

(ii) बहवः शिष्याः कुत्र आसन् ?

(iii) वासुदेवः कस्य प्रियशिष्यः आसीत् ?

(iv) गुरुः शिष्यम् आहूय कदा अवदत् ?

(v) सर्वविद्यापारङ्गतः कः अभवत् ?

(स) सूर्यवंशस्य राजा सगरः आसीत्। सः एकदा अश्वमेधयागं कृतवान् । यागस्य अन्त रागस्य अश्वः यत्र तत्र सञ्चारं कृतवान् । अश्वमेधं कृत्वा सगरः स्वयम् इन्द्रः भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् सः यागस्य विघ्नं कर्तुं मार्ग चिन्तितवान्। ततः अश्वं गृहीत्वा पाताललोके कपिलमुनेः पुरतः स्थापितवान् । तदा मुनिः तपः कुर्वन् ध्याने आसीत्। अतः सः किमपि न ज्ञातवान्।

प्रश्न-(i) सूर्यवंशस्य राजा कः आसीत् ?

(i). सः एकदा किं कृतवान् ?

(iii) यागस्य अश्वः कुत्र सञ्चारं कृतवान् ?

(iv) कः यागस्य विघ्नं कर्तुं मार्ग चिन्तितवान् ?

(v) इन्द्रः अश्वं गृहीत्वा पाताललोके कस्य पुरतः स्थापितवान् ?

प्रश्न १०. अधोलिखित पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत- ५×२=१०

(अ) मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत्।

मन्त्रेण रक्षयेद् गूढं कार्ये चाऽपि नियोजयेत् ॥

प्रश्न-(i) कार्य कया चिन्तितम् ?

(ii) वाचा किं न प्रकाशयेत् ?

(iii) गूढं केन रक्षयेत् ?

(iv) कार्ये कि नियोजयेत् ?

(v) 'रक्षयेत्' इति शब्दस्य धातुं लकारं पुरुषं च लिखत ।

(ब) वहन्ति वर्षन्ति नदन्ति भान्ति, ध्यायन्ति नत्यन्ति समाश्वसन्ति।

नद्यो घना मत्तगजाः वनान्ताः, प्रियाविहीनाः शिखिनः प्लवङ्गमाः।

प्रश्न-(i) काः वहन्ति ?

(ii) के वर्षन्ति ?

(iii) मत्तगजाः किं कुर्वन्ति ?

(iv) के नृत्यन्ति ?

(v) 'ध्यायन्ति' इति शब्दस्य धातुं लकारं पुरुषं वचनञ्च लिखत।

(स) गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा।

पापं तापं च दैन्यं च घ्नन्ति सन्तोमहाशयाः।

प्रश्न- (i) का पापं हन्ति ?

(ii) शशी किं करोति ?

(iii) कल्पतरुः किं हन्ति ?

(iv) पापं तापं दैन्यं च के घ्नन्ति ?

(v) 'पापम्' इति शब्दस्य विलोमपदं लिखत।

प्रश्न ११. युग्ममेलनं कुरुत- १×४=४

| (अ) | (ब) |
|---|---|
| (क) गज इव | (i) गुरूदक्षिणार्थी |
| (ख) कौत्सः | (ii) मदान्धः |
| (ग) जर्जरम् | (ii) षष्ठिसहस्त्रपुत्राः |
| (घ) सगरस्य | (iv) शरीरम् |
| | (v) भूषणम् |

उत्तर-(क) →(ii), (ख) →(i),(ग)->(iv),(घ)-(iii).

प्रश्न १२. शुद्धवाक्यानां समक्षं आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत- १×४=४

(क) वृक्षाणां छेदनं महत् पापम्।

(ख) सर्वकालविचारी न भवेत्।

(ग) शुद्धोदनः राहुलस्य पिता आसीत्।

(घ) कुबेरः रघु धनं दत्तवान्।

उत्तर-(क) आम, (ख) न, (ग) न, (घ) आम्।।

प्रश्न १३. अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत- १×४=४

(क) शिववीरः छत्रसालाय किं नामकं कृपाणम् अयच्छत्?

(ख) आत्महिताय किम् अनुष्ठेयम्?

(ग) ग्रामे कः वृक्षः आसीत् ?

(घ) भारतीयैकता साधकं किम् ?

(ङ) जलं विना किं न सम्भवम्? http://www.mpboardonline.com

उत्तर-(क) भवानीति, (ख) सद्वृत्तम्, (ग) न्यग्रोधवृक्षः, (घ) संस्कृतम्, (ङ) जीवनम्।

प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत। ४

प्रश्न १५. स्वप्राचार्यस्य कृते पञ्चदिवसानाम् अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत। ४

अथवा

स्वमित्राय एक शुभकामनापत्रं संस्कृते लिखत।

प्रश्न १६. अधोलिखितेषु पञ्च अशुद्धकारकवाक्यानां शुद्धिः करणीया- १×५=५

(क) सीता रामस्य सह वनं गता।

(ख) जलस्य विना जीवनं नास्ति।

(ग) एषा बालः अस्ति।

(घ) ईश्वरं नमः।

(ङ) त्वं नाम किम?

(च) सैनिकः अश्वेन पतति।

प्रश्न १७. अधोलिखितवाक्यानां कथानुसारेण क्रम-संयोजनं कुरुत-

(१) तस्मै शिवराजवीरोऽपि सर्वविधं साहाय्यं कर्तुं वचनं अयच्छत् ।

(२) यथासमये एतदर्थम् एवं छत्रसालः शिववीर महाराजाम् अपि मिलितवान्।

(३) तथा च स्वतन्त्रतायै योद्ध स्वाशीर्वादस्वरूपं 'भवानीति' नामक कृपाणम् अपि दत्तवान्।

(४) बुन्देलकेसरी' इति विख्यातस्य छत्रसालस्य जन्म १६४९ तमे ईस्वीये अभवत्।

(५) अयं वीरः बाल्यकालादेव भारतमातरं मुगलशासनात् विमोक्तुं प्रयतते स्म।

उत्तर-(४) →(५)→(२)→(१)→(३)।

प्रश्न १८. अधोलिखितम् अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत- http://www.mpboardonline.com ५

शरीरं धर्मस्य प्रथमं साधनम् अस्ति-'शरीरमाद्यं खलु धर्मसाधनम्'। शरीरस्य आरोग्यं व्यायामेन सिध्यति। यः व्यायाम करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति। व्यायामेन शरीरे शुद्धरक्तसञ्चारः भवति । इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति । जठराग्निः दीप्तः भवति । परिवृद्धम् उदरं सङ्कोचं गच्छति। मस्तिष्कम् उर्वरं भवति। अस्मिन् लोके जनैः वयोऽनुसारं व्यायामः अवश्यः करणीयः।

उपर्युक्तगद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत

(१) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(२) धर्मस्य प्रथम साधनं किम् अस्ति ?

(३) कीदृशम् उदर व्यायामेन सङ्कोचं गच्छति ?

(४) अस्य गद्यांशस्य सारं लिखत।

(५) 'गच्छन्ति' इति पदे का धातुः अस्ति ?

प्रश्न १९. अधोलिखितेषु एक विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत- १०

(क) अनुशासनम्,

(ख) महाकवि कालिदासः,

(ग) संस्कृतभाषायाः महत्त्वम्,

(घ) मम दिनचर्या ।